## 16 - षोडश दशकम्
## नरनारायणावतारम् दक्षयागम् च

दक्षो विरिञ्च तनयोऽथ मनोस् तनूजां
लब्ध्वा प्रसूति मिह षोडश चाप कन्याः ।
धर्मे त्रयोदश ददौ पितृषु स्वधां च
स्वाहां हविर्भुजि सतीं गिरिशे त्वदंशे ॥ ॥16-1॥

मूर्तिर्हि धर्म गृहिणी सुषुवे भवन्तं
नारायणं नर सखं महितानु भावम् ।
यज्जन्मनि प्रमुदिताः कृत तूर्य घोषाः
पुष्पोत्करान् प्रववृषुर् नुनुवुस् सुरौघाः ॥ ॥16-2॥

दैत्यं सहस्र कवचं कवचैः परीतं
साहस्र वत्सर तपस् समराभिलव्यैः ।
पर्याय निर्मित तपस् समरौ भवन्तौ
शिष्टैक कङ्कट ममुं न्यहतां सलीलम् ॥ ॥16-3॥

अन्वाचरन् नुपदिशन् नपि मोक्ष धर्मं
त्वं भ्रातृमान् बदरि काश्रम मध्यवात्सीः ।
शक्रोऽथ ते शम तपोबल निस्सहात्मा
दिव्याङ्गना परिवृतं प्रजिघाय मारम् ॥ ॥16-4॥

कामो वसन्त मलयानिल बन्धु शाली
कान्ता कटाक्ष विशिखैर् विकसत् विलासैः ।
विध्यन् मुहुर्मुहु रकम्प मुदीक्ष्य च त्वां
भीतस् त्वयाऽथ जगदे मृदुहास भाजा ॥ ॥16-5॥

भीत्याऽल मङ्गज वसन्त सुराङ्गना वः
मन्मानसं त्विह जुषध्व मिति ब्रुवाणः ।
त्वं विस्मयेन परितस् स्तुवता मथैषां
प्रादर्शयस् स्वपरिचारक कातराक्षीः ॥ ॥16-6॥

सम्मोहनाय मिलिता मद नादयस्ते
त्वद् दासिका परिमलैः किल मोह मापुः ।
दत्तां त्वया च जगृहुस् त्रपयैव सर्व
स्वर्वासि गर्व शमनीं पुनरुर्वशीं ताम् ॥ ॥16-7॥

दृष्ट्वोर्वशीं तव कथां च निशम्य शक्रः
पर्याकुलोऽजनि भवन् महिमाव मर्शात् ।
एवं प्रशान्त रमणीयत रावतारात्
त्वत्तोऽधिको वरद कृष्ण तनुस् त्वमेव ॥ ॥16-8॥

दक्षस्तु धातु रति लालनया रजोऽन्धः
नात्यादृतस् त्वयि च कष्ट मशान्ति रासीत् ।
येन व्यरुन्ध स भवत् तनुमेव शर्वं
यज्ञे च वैरपिशुने स्वसुतां व्यमानीत् ॥ ॥16-9॥

क्रुद्धेश मर्दित मखस् स तु कृत्त शीर्षः
देव प्रसादित हरादथ लब्ध जीवः ।
त्वत् पूरित क्रतुवरः पुनराप शान्तिं
स त्वं प्रशान्तिकर पाहि मरुत्पुरेश ॥ ॥16-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥